# Shri Ganga Stotram

# શ્રીગઙ્ગાસ્તોત્રમ્

## Document Information

Text title : Ganga Stotram by Swami Tapovanam

File name : gangAstotramtapovanam.itx

Category : devii, devI, nadI, stotra

Location : doc_devii

Author : Swami Tapovanam

Proofread by : Rajesh Thyagarajan

Latest update : August 17, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2025

*sanskritdocuments.org*

# શ્રીગઙ્ગાસ્તોત્રમ્

શ્રીગઙ્ગોત્તરીક્ષેત્ર વાસ્તવ્યેન
પૂજ્યપાદશ્રીતપોવનસ્વામિનાસમ્પ્રણીતં
શ્રી ગઙ્ગાસ્તોત્રમ્ ।

## પ્રથમઃ સ્તબકઃ

જય જય જગદમ્બ ! શ્રીગલ શ્રીજટાયાં
જય જય જયશીલે ! જહ્નુકન્યે ! નમસ્તે ।
જય જય જલશાયિ શ્રીમદઙ્ઘ્રિપ્રસૂતે !
જય જય જય ભવ્યે ! દેવિ ! ભૂયો નમસ્તે ॥ ૧॥

ત્રિપથ પથિક પાથઃ સ્રોતસા સિદ્ધિમૂર્તિ-
ર્દિનકર કુલભૂષારત્ન યત્નોદયોત્થા ।
પ્રણતજન સુરદ્રુઃ પાવની પાવનાનાં
જયતિ જગતિ ગઙ્ગા ભાગ્યપૂગો જનાનામ્ ॥ ૨॥

ગઙ્ગે ! માતરનુસ્મરામિ સતતં ત્વન્મૂર્તિમત્યદ્ભુતાં
દેવીં દૈવતદુર્લભાં યમુનયા વાચાઽન્નસમ્પૂર્ણયા ।
ભક્ત્તેનાથ ભગીરથેન ભગવત્પાદૈશ્ચ પાદાર્ચ કૈ-
ર્યા નિત્યં સમુપાશ્રિતા વિજયતે ગઙ્ગોત્તરી સદ્મનિ ॥ ૩॥

તુહિન શિખરિશ◌ૃઙ્ગે દિવ્યસૌભાગ્યસમ્પ-
ન્મહિમનિ વિહરન્તીં પુષ્પવાસે વિશાલે ।
સુકૃતિ સમધિગમ્યે સમ્યગાલીજનાલી-
વિલસિતમલસાક્ષીં નૌમિ ગઙ્ગામભીક્ષ્ણમ્ ॥ ૪॥

પાદાઙ્ગુષ્ઠાદ્વોદિતા દેવિ ! વિષ્ણો-
ર્ગઙ્ગોત્તર્યાં ગોમુખી મસ્તકાદ્વા ।

ગઙ્ગા ગઙ્ગૈવાસ્ય વાધો ન કિંચ્ચિત્
સર્વેશિત્રી સર્વથા હિ ત્વમમ્બ ! ॥ ૫॥

અયિ ભગવતિ ! ભવ્ય શ્રીમુખ શ્રીનિતમ્બે
તુહિન મુકુરહર્મ્યસ્યાન્તરન્તર્વધૂવત્ ।
અહહ ! ચરસિ ચિત્તં ત્વન્તુ માતા જગત્યા-
સ્તદપિ કથમસૂર્યં પશ્યતાં યાસિ સહ્રીઃ ॥ ૬॥

પાપૈર્મુખં સમભવત્ ખલુ નીલનીલં
યસ્યામ્બ ! તસ્ય તવ વેશ્મ નિરીક્ષણેન ।
શ્રીમન્મુખં ભવતિ ભાસ્કર ભાસિ નૂત્નં
મન્યેઽર્થવત્તત ઇદં તવ વેશ્મનામ ॥ ૭॥

પ્રસીદ ભગવત્યમ્બ ! પ્રસીદ કરુણામ્બુધે ! ।
પુનીહિ સ્વાત્મતુલ્યં મે મનો મલમલીમસં ॥ ૮॥

મલિનં મલિનં ચિત્તમત્યન્ત મલિનં શુભે ! ।
કુતો ન કુરુષે દૃષ્ટિં મયિ સર્વ મલાપહામ્ ॥ ૯॥

ચિત્તં વિશોધય બહિર્વિષયાભિષક્ત-
મન્તર્નિરુન્ધિ ભવદઙ્ઘ્રિસરોજ યુગ્મે ।
યાવદ્વિનિશ્ચરતિ બાહ્યવિલોકિતી હૃ -
ત્તાવત્ કથં જનનિ ! સૌખ્યકથા નરાણામ્ ॥ ૧૦॥

માતર્જાહ્નવિ ! નિહ્નવે તુ જગતઃ
પૃથ્વ્યાદિ મિથ્યાત્મનો
યત્તત્ત્વં ન નિષિદ્ધ્યતે તદચલં
ત્વન્માત્રમેકાકિની ।
યસ્માત્ત્વં સદશેષમૂલમમલં
બ્રહ્મૈવ નિર્ધર્મકં
મન્દેભ્યઃ ખલુ કલ્પિતા જલમયી
મૂર્તિસ્તવાન્યાચયા ॥ ૧૧॥

અચ્છિન્નરૂપિણી દેવી નિત્યા યા મૃત્યુમત્યગાત્ ।
પ્રાણિતિ પ્રાણહીનાચ જાહ્નવી સાઽસ્તુ મે ગતિઃ ॥ ૧૨॥

સર્વદા સર્વદૃગ્દેવી સર્વકર્ત્રી ચ યા સ્વયમ્ ।

સર્વભાવૈઃ પ્રપદ્યે તાં જાહ્નવીં સુરનિમ્નગામ્ ॥ ૧૩॥

પશ્યન્તુ કેચિદમલં જલમેવ ગઙ્ગે-
ત્યન્યે વયં તુ ભવયન્ત્રવિમુક્તિહેતુઃ
શ્રીમૂલશક્તિરખિલેશ્વરરૂપરૂપિ-
ણ્યાનન્દ કન્દમિતિ નિત્યમુપાસ્મહેત્વામ્ ॥ ૧૪॥

શ્રદ્ધૈવ મૂલં ત્વદુપાસનાયા
જલેઽપિ દેવત્વ વિધાન દક્ષા ।
શ્રદ્ધાં વિના કઃ પરલોક ચિન્તા-
મગ્નઃ પ્રવર્તેત પરોક્ષકાર્યે ॥ ૧૫॥

પ્રાગ્જન્મપુણ્ય નિચયેન તવાઙ્ઘ્રિપદ્મે
શ્રદ્ધા ભવેત્ સ્થિરતરાઽથચ ભક્તિભાવઃ ।
ભક્ત્યાચ ભાવુકનિધે ! પુરુષાર્થસિદ્ધિઃ
શ્રદ્ધોજ્ઝિતઃ સ્વયમપુચ્છપશુર્ધરણ્યામ્ ॥ ૧૬॥

પ્રફુલ્લનીલોત્પલ કાન્તિચોરૈઃ
કટાક્ષપાતૈસ્તવ પાવિતો યઃ ।
નિરન્તશાન્તિઃ સમુદેતિ પુંસ-
સ્તસ્યૈવ ભાગીરથ ! ભાગ્યભાજઃ ॥ ૧૭॥

કિં વા મુણ્ડનતઃ કિમસ્તિ જટયા
વૈવર્ણ્ય વસ્ત્રેણ કિં
કિં વા વસ્ત્ર વિસર્જનેન ભસિતા -
લેપેન જાપેન કિમ્ ।
ભિક્ષાન્નાશનતશ્ચ કિં વ્રતશતૈ-
સ્તીર્થેષુ ચાટાટ્યયા
વિશ્વાધીશ્વરિ ! યુષ્મદઙ્ઘ્રિયુગલે
ભક્તિર્ન ચેન્નિશ્ચલા ! ॥ ૧૮॥

ગુહાચ્છિદ્રે વાદ્રેઃ શિખરભુવિ વા ઘોરગહને
શ્મશાને વૈકાકી વસતુ વસતૌ વા નિજજનૈઃ ।
મહાભાગે ! ભાગીરથિ ! તવપદાં ભોજભજન-
પ્રમત્તશ્ચિતશ્ચેત્ સતુ પરમયોગી સતુ સુખી ॥ ૧૯॥

યદ્વા યોગી જાહ્નવિ ! કર્મી તવ ભક્તો

યદ્વા જ્ઞાની ત્વતિરન્તર્યદિનો ચેત્ ।
અવ્યાવૃત્તા તર્હ્યપિ યોગાદિ મહાર્હ
મન્યે મોઘં મોઘ મશેષં ખલુ તેષામ્ ॥ ૨૦॥

યુષ્મત્પદાબ્જરતિરેવ શિવે ! વિશુદ્ધં
વૈરક્ત્ય મન્યદખિલં ખલુમોહસિદ્ધમ્ ।
કો વા સુધીસ્તમભિવાઞ્છતિ કાષ્ટભાવં
યં હા વિતૃષ્ણપદવીતિ વિદન્તિ મુર્ખાઃ ॥ ૨૧॥

વૈરાગ્યં યદિહાપરત્ર વિષયે-
ષ્વિચ્છાક્ષય સ્તર્હ્યમી
બાલોન્મત્તજડાદયોઽપિ સુતરાં
વૈતૃષ્ણ્યસીમાજુષઃ ।
હે દેવિ ! ત્વદભ્રશુભ્રવપુરા-
પૂર્ણં સદા પશ્યતો
યોપેક્ષામતિ રન્યવસ્તુષુ ?? દૃઢા
વૈરક્તત્ય મેતન્મ તમ્ ॥ ૨૨॥

શાન્તિઃ કથં વિષયલેશમસંસ્પૃશન્તી
ચિત્તં ન ચેત્વયિ નિપક્તમચણ્ડમૂર્તૌ ।
જ્ઞાનાસ્થિકે ! જનનિ ! જહ્નુસુતે ! નિસર્ગ-
સિદ્ધઃ સદૈવ મનનં મનસો હિ ધર્મઃ ॥ ૨૩॥

યુષ્મત્સ્વરૂપસુખસાગરમમગ્નબુદ્ધેઃ
શામ્યેત્ સ્વતોઽક્ષકુલમુદ્ભટમેષદાન્તિઃ ।
દુઃખસ્ય કસ્યચિદતોઽસ્ફુરણં તિતિક્ષા
ન્યગ્રોધભૂર્જસમધર્મદશા ત્વવિદ્યા ॥ ૨૪॥

તથા ચ માતર્ભવદીયતત્ત્વ-
ક્રીડાપરસ્યાન્યકૃતે નિવૃત્તિઃ ।
જ્ઞેયઃ સ નિત્યોપરમો નયાગ્યા
વારણ્યવાસોઽલસતા નિધીનામ્ ॥ ૨૫॥

ઇતિ પ્રથમઃ સ્તબકઃ સમાપ્તઃ ।

## દ્વિતીયઃ સ્તબકઃ

માતર્માયે ! નમસ્તુભ્યમુદ્ધરૈનં ભવામ્બુધેઃ ।
શક્તિઃ શક્તાત્પૃથઙ્નાસ્તીતીશ્વરો હિ ત્વમીશ્વરો ॥ ૧॥

ફલમત ઉપપત્તેર્ન્યાયતોઽસ્માદકસ્માત્
ફલમિહ સુકૃતાનાં દુષ્કૃતાનાઞ્ચ ન સ્યાત્ ।
ફલતિ ફલ વિધાત્ર્યા બ્રહ્મમૂર્ત્યા ભવત્યાઃ
પ્રતનુ ! કરુણયૈવ પ્રાણિનાં કર્મજાતમ્ ॥ ૨॥

બોધશ્ચ મોહવિપિનોત્તરણૈકપદ્યા
ન પ્રાપ્યતે ભવદનુગ્રહમન્તરેણ ।
દેવિ ! ત્વમેવ વિદધાસિ વિમુક્તિહેતું
બોધં યથાઽન્ધતમસં ખલુબન્ધ હેતુમ્ ॥ ૩॥

હે દેવિ ! ધર્મિપ્રતિયોગિરૂપા-
ચ્છિન્નત્વતઃ સિદ્ધ્યતિ નો પૃથક્ત્વમ્ ।
પરસ્પરાલમ્બતયાઽત્ર યુષ્મત્-
કૃપાં વિના કસ્ય ભવેત્ પ્રતિષ્ઠા ॥ ૪॥

ઘટો ન વૈ સિદ્ધ્યતિ તદ્ધિયં વિના
વિના ઘટં ધીરપિ તસ્ય નો દિયાત્ ।
ઇતિદ્વયઞ્ચેત્ પ્રતિષિદ્ધ્યતે ભવત્-
પદૈકભક્તસ્ય ભવેત્તદાત્મતા ॥ ૫॥

સતોઽસતશ્ચાપિ વિલક્ષણં યત્
સત્ત્વાત્મકં જાગતબીજમાહુઃ ।
અજ્ઞાનમસ્મિંસ્તવ સમ્પ્રસાદા-
ચ્છ્રદ્ધા ભવેદવ્યભિચારિણી નુઃ ॥ ૬॥

સૈષા ચૈત્રપ્રમિતિરુદિતા તત્પ્રમાપ્રાગભાવો-
દ્રિક્તાનાદિપ્રણાશનકરી મૈત્રમાવત્ પ્રમાત્વાત્ ।
ત્વદ્વાહ્યસ્ય પ્રિયતનુ ! મહાવિદ્યયાઽજ્ઞાનસિદ્ધિ-
ર્યદ્વદ્વીણાવદનમફલાઽશ્રોત્રવચ્છોત્રમૂલે ॥ ૭॥

સત્યાસત્યાનધિકરણતા જ્ઞાનવાધ્યત્વ મેવં
સ્વાધિષ્ઠાનસ્થિત દૃઢનિષેધ પ્રતિદ્વન્દ્વિતા વા ।

મિથ્યાત્વઞ્ચેદ્બહુતરમહોલક્ષ્યતે લક્ષ્યવિદ્ભિ-
ર્મિથ્યા નસ્યાજ્જગદિદમનેના પ્રિયેભ્યસ્તવામ્બ ! ॥ ૮॥

યેઽર્થાઃ પ્રોક્તા જનનિ ! મુનિના માનમેયાદિસંજ્ઞા-
સ્તન્ત્રેઽન્યસ્મિન્નિપુણધિષણૈઃ ષોડશાનાં ચ તેષામ્ ।
નૈરુક્ત્યઞ્ચેન્નિરુપમગિરા ખણ્ડ્યતે ખણ્ડકારૈઃ
સત્યત્વં કિં ત્યજતિભુવનં ત્વત્પદાદ્બાહ્યબુદ્ધેઃ ॥ ૯॥

કઃ સ્વપ્રકાશઃ સ્વશ્ચાસૌ પ્રકાશશ્ચેતિ વા સ્વયમ્ ।
સ્વસ્ય પ્રકાશ ઇત્થં વા ન ભવેદન્યથાપિ વા ॥ ૧૦॥

અવેદ્યત્વેઽપરોક્ષત્વં સ્વપ્રભત્વમિતિ સ્થિતિઃ ।
પ્રાવોચચ્ચિત્સુખાર્યશ્ચેદન્યેઽપ્યેવં મુનીશ્વરાઃ ॥ ૧૧॥

સ્વપ્રકાશતનો ! સ્વાત્મા સ્વપ્રકાશઃ કથં સ્ફુરેત્ ।
તસ્યયસ્ય મનોસ્રક્તં ત્વત્પાદસરસી રુહે ॥ ૧૨॥

બ્રહ્મ સત્યઞ્જગન્મિથ્યા જીવો બ્રહ્મેતિ કેવલમ્ ।
ભાષ્ય કૃભાષ્યસન્દર્ભૈરભ્યધાચ્છઙ્કરો ગુરુઃ ॥ ૧૩॥

તથાઽપીશિત્રિ ! કો જન્તુર્વિદ્યામૃતૈસ્તવાનઘે ! ।
શક્તિપાતં વિનાવિદ્યાદ્બ્રહ્મૈવાહમિતિ સ્ફુટમ્ ॥ ૧૪॥

વાગારભ્યા વિકૃતિરખિલા મૃત્તિકેત્યેવ સત્યં
શ્રુત્વાપ્યેવં શ્રુતિગિરમથ શ્રાવયિત્વાપિ શિષ્યાન્ ।
કો વા પ્રાજ્ઞઃ પ્રભવતિ ભુવિ ત્યતુમિષ્ટાન્ સ્વભોગાન્
રન્તુઞ્ચાવ ! ત્વદ્મલપદે ત્વત્કૃપાવિપ્રકૃષ્ટઃ ॥ ૧૫॥

ન મેધયા શાસ્ત્રવાદદ્વૈખર્યા ચ વરાનને ! ।
ત્વત્કૃપામૃતસેકેન ભવતાપઃ પ્રશામ્યતિ ॥ ૧૬॥

ગઙ્ગે ! ગઙ્ગે ! નમસ્તુભ્યં માતર્માતર્નમોમનઃ ।
કૃપયાદેહિ મે નિત્યં ત્વયિ નિષ્ઠામખણ્ડિતામ્ ॥ ૧૭॥

આચાર્યનામ નિગદન્ત્યભિમાન યુક્તા
યુદ્ધ્યન્તિ ચ સ્વમતનૈગમતા પ્રસિદ્ધ્યૈઃ ।
નાચાર્યચોદિત વિધિં ત્વનુયન્તિ લોકા-
સ્તન્નિષ્ઠતા હિ નિખિલોર્યમતૈકધર્મઃ ॥ ૧૮॥

મુણ્ડિત્વ દણ્ડિત્વ જટિત્વ વેષૈ-
રાચાર્યપારમ્પરિકત્વતશ્ચ ।
પિચણ્ડપૂર્તિઃ ફલમમ્બ ! નાન્યત્
પુમર્થહેતુ સ્ત્વદનન્ય ભક્તિઃ ॥ ૧૯॥

ત્વતત્ત્વનિર્ણયવિધૌ સહકારિ પૂર્વા-
ચાર્યૈઃ પ્રભાષિતમપિ સ્વમતિ પ્રયોગઃ ।
પ્રાધાન્યમેતિ ન હિ વિન્દતિ મેષવૃત્તિ-
ર્બ્રહ્માત્મિકેંવ ! તવ તત્ત્વમનર્થ મૃચ્છેત્ ॥ ૨૦॥

કપિલોયદિ સર્વજ્ઞઃ કણાદો નેતિકાપ્રમા ।
ઇતિ પ્રેક્ષાપરેત્યેષ ભણત્યાભાણકઃ સ્ફુટમ્ ॥ ૨૧॥

શ્રુતિઃ પ્રમાણં પ્રમિતૌ તવેત્યૃષિ -
ર્જગાદબાઢં કિલ બાદરાયણઃ ।
તથાપિ ભાગીરથિ ! તીક્ષ્ણબુદ્ધય-
સ્તદર્થમર્થાદધિગન્તુમીશતે ॥ ૨૨॥

ધિયઃ પ્રકર્ષોઽથ વિચારશુદ્ધિ-
ર્ભવત્સ્વરૂપાવગતિશ્ચ નૂનમ્ ।
ભવે ! ભવપ્રેષ્ઠતમે ! ભવત્યા
ભવત્યભીક્ષ્ણં કૃપયૈવ પુંસામ્ ॥ ૨૩॥

નાનામતૈર્ન્યાયવિશેષ યુક્તૈ-
ર્વિવર્દ્ધિતેહ્યાસ્તિકનાસ્તિકૈશ્ચ ।
કઃ શબ્દજાલેન વિમુહ્યતિ શ્રી-
પદારવિન્દાનનુષક્તવૃત્તિઃ ॥ ૨૪॥

પદામ્બુજં તે શરણં મમામ્બ !
પ્રસીદ નાન્યચ્છરણં પ્રપદ્યે ।
ત્વત્પાદભક્તિર્ગતિરિત્યનન્યા
મન્યે મનોઽતીત ભવત્પદાત્યૈ ॥ ૨૫॥

ઇતિ દ્વિતીયઃ સ્તબકઃ સમાપ્તઃ ।

## તૃતીયઃ સ્તબકઃ

સચ્ચિન્મૂર્તેર્યત્તવાસ્તિત્વમસ્મિન્
સન્દિગ્ધેયઃ સ્વસ્ય હન્તાસ્તિતાયામ્ ।
સન્દિગ્ધે સ વ્યાહત જ્ઞપ્તિરમ્બ !
સ્વાત્મહિત્વં તસ્થુષોઽતસ્થુષશ્ચ ॥ ૧॥

સ નાહમસ્મીતિ નિષેધતિ સ્વં
યઃ શ્રીપકન્યે ! પ્રતિષેધતિ ત્વામ્ ।
સ્વસ્ય સ્વયં વૈ ન ભવેન્નિષેદ્ધા
તસ્માત્ કથં દેવિ ! નિરસ્યસે ત્વમ્ ॥ ૨॥

સત્તાસ્વરૂપેણ સમન્તતસ્ત્વં
વિભ્રાજસેંઽબ સ્વમહિમ્નિ નિત્યમ્ ।
સત્તાતિરિક્તં તવ નાસ્તિ સત્તા
સત્ત્વસ્ય કસ્યાપિ ઘટાદિકસ્ય ॥ ૩॥

ત્વત્સત્ત્વ માયે ! નિગદત્યભીષ્ણં
બુધ્ધિઃ સતાં શુધ્દ્ર વિચારદક્ષા ।
સ્વતઃ પ્રમાણં શ્રુતિરપ્ય મન્દ-
સ્વરેણ ગાયત્યખિલેશ્વરિ ! ત્વામ્ ॥ ૪॥

દૃષ્ટ્વેમમદ્ભુતતરં પ્રકૃતિ પ્રપઞ્ચં
કોવા વિચક્ષણમતિઃ ખલુ તદ્વિધાત્રીમ્ ।
ત્વામમ્બ ! સમ્યગનુમાતુ મનીશ્વરઃ સ્યાત્
કાર્યં હિ ન ક્વચિદકારણ મસ્તિ દૃષ્ટમ્ ॥ ૫॥

જલ્પન્તુ શૂન્યમતયસ્તવ શૂન્યભાવં
નિન્દન્તુ ચાધિકમધીરિતિ વઞ્ચિતોઽયમ્ ।
સચ્ચિઘને ! તવ પદામ્બુજ ભક્તિશીલાન્
ભક્તાસ્તથાપિ ન ભવદ્વિમુખા ભવેયુઃ ॥ ૬॥

આત્મૈવ ત્વં હિ ભક્તાનામસિત્વં શૂન્યતાકથમ્ ।
અસિ ચેત્વયિ વૈરસ્યં કથં નિત્ય સુખોદધૌ ॥ ૭॥

નાસ્તીતિ ભવતી કેન સાદ્ધ્યતે સિધ્દરૂપિણી ।
તથા ચ સર્વશાસિત્રી હાસ્તિ ચેન્નાસ્તિકો હતઃ ॥ ૮॥

ત્વચ્છક્તિ માહાત્મ્યમહસ્કરોધત્-
પ્રભાવદમ્બ ! પ્રસૃતં પ્રસિદ્ધમ્ ।
તથાઽપિ સત્ત્વં તવ શઙ્ક્યતે યૈ-
ર્નમોઽસ્તુ તેષાં ધિષણોદયાય ॥ ૯॥

ઇન્દ્રાર્ક ચન્દ્રાર્ક સુતાગ્નિવાયુ-
પ્રાયા ?? મહૈશ્વર્યયુતા અપી મે ।
દેવાઃ કથં નોપરતા ભવન્તિ
સ્વસ્વક્રિયાભ્યઃ સુવિચાર્યમેતત્ ॥ ૧૦॥

અહો નિયન્ત્ર્યાસ્તવ શાસનેન
જગત્ સચન્દ્રાર્કમિદં યથાવત્ ।
પ્રવર્તતે નાતિગમઃ કદાચિ -
ન્નોચેદમર્યાદમિદં વિનશ્યેત્ ॥ ૧૧॥

એવઞ્ચ સત્ત્વં તવ ચેશ્વરત્વં
યદિ પ્રસિદ્ધ્યત્યવિશઙ્ક મમ્બ ! ।
સેવા નિયન્ત્ર્યાસ્તવ મુખ્યધર્મો
નિયમ્યજન્તોરિતિ કિં નિયમ્યમ્ ॥ ૧૨॥

સાકારચિન્તાઽથ નિરાકૃતે ર્વા
ચિન્તા વિધેયેતિ વૃથા વિવાદઃ ।
ચિન્ત્યસ્વરૂપાગ્રહતો હિ કાર્ય-
શ્ચિન્તા સ્વરૂપે ખલુ ચિત્તબન્ધઃ ॥ ૧૩॥

સ્ફુટાપરોક્ષં તવ ભક્ત ચેતઃ
સર્વં હિ સમ્પશ્યસિ સર્વદૃક્ત્વમ્ ।
તથાચ ભક્તેસ્તવ નાકૃતીનાં
વૈશિષ્ટ્યમીશિત્રિ ! નિરીક્ષસેત્વમ્ ॥ ૧૪॥

ત્વત્તત્ત્વ યાથાત્મ્ય વિનિર્ણયાત્મ-
ન્યહો મહાદુષ્કરકર્મણિસ્યાત્ ।
કો વા સમર્થઃ સ્ખલિતેઽપિ દોષઃ
કો વા યદિ ત્વદ્ગતિર પ્રકમ્પા ॥ ૧૫॥

આકારભેદેષુ નિરાકૃતૌ વા
નિષ્ઠૈવ કાર્યા દૃઢમન્વર્જમ્ ।

નિષ્ઠા સવિત્રી નતુ રૂપભેદઃ
ફલસ્ય યસ્માત્તવ વિશ્વમૂર્તે ! ॥ ૧૬॥

મિથ્યાઽથ સદ્વેતિ જગદ્દિનાનિ
વિવાદતો હન્ત નયન્તિ લોકાઃ ।
મિથ્યાત્વ સત્યત્વ વિચારણેન
કિં વા પિપાસોસ્તવ ભક્તિપેયમ્ ॥ ૧૭॥

યથા તથૈવાસ્તુ ન કાકદન્ત-
પરીક્ષણવ્યગ્રતયાઽસ્તિ કિઞ્ચિત્ ।
પરાત્ પરે ! ત્વત્પદપદ્મ સેવા-
રતિઃ સ્વયં મુક્તિપદૈક હેતુઃ ॥ ૧૮॥

કો વા વિજાનાતિ વિશેષતસ્ત્વત્-
સ્વરૂપયાથાત્મ્યમબુદ્ધિગમ્યમ્ ।
ત્વત્સૃષ્ટિ માહાત્મ્યમપીશ્વરિ ! સ્વાં
સ્વપ્રક્રિયાં ચ સ્વયમેવ વેત્સિ ॥ ૧૯॥

કો વેદ કોવા વદતીહ સમ્ય-
ગિયં વિસૃષ્ટિર્યત આબભૂવ ।
અહો મહાદુર્ગમમમ્બ ! યુષ્મદ્ -
સતત્ત્વ મિત્યાર્ષનિરૂક્તિ રેષા ॥ ૨૦॥

સ્વયમેવાત્મનાત્માનં વેત્થત્વં વેદરૂપિણિ ! ।
ત્વમેવાદિ ર્હિ ભૂતાનાં ત્વાં વેત્તીતીતરઃ કથમ્ ॥ ૨૧॥

તથાપિ યત્કિઞ્ચિદવેત્ય શબ્દતઃ
સંસ્કારતો દેવિ ! વિચારતસ્તથા ।
ત્વત્તત્ત્વ મુન્નિદ્રમુપાસતે તુ યે
કૃતાર્થયન્ત્યેવ ત આત્મસમ્ભવમ્ ॥ ૨૨॥

ન કામયેઽન્યં પુરુષાર્થમીશ્વરિ !
ત્વત્પાદભક્તેર્બહુશાસ્ત્રકાનને ।
ઘૂર્ણે કિમભ્યર્ણ સિત્વ મિત્યહં
યચ્છ્રદ્ધેઽધ્રી તવયામિ ચાશ્રયમ્ ॥ ૨૩॥

પ્રદેહિ ભક્તિં ત્વયિ નિત્ય નિશ્ચલા-

માનન્દરૂપામવિકલ્પ સઙ્ગિનીમ્ ।
અધ્યાત્મ સામ્રાજ્યપદં ત્વદાત્મિકા-
મહો કિમેતૈ બહુદર્શનશ્રમૈઃ ॥ ૨૪॥

નાસિત્વમિત્યપવદન્તુ હ નાસ્તિકા સ્ત્વાં
નાસ્ત્યર્ક ઇત્યવદન્તિ યથા દિવાન્ધાઃ ।
વિશ્વેશ્વરિ ! ત્વમસિ નિત્યમિતિ પ્રપશ્યન્
સઙ્ક્રીડતે તુ સતતં ત્વયિ માનુષોઽયમ્ ॥ ૨૫॥

ઇતિ તૃતીયઃ સ્તબકઃ સમાપ્તઃ ।

## ચતુર્થઃ સ્તબકઃ

બ્રહ્માત્મિકે ! જનનિ ! સત્યસુખસ્વરૂપે !
ત્વત્તત્ત્વચિન્તનવિધૌ કથયન્તિ કેચિત્ ।
સર્વક્રિયોપરમણં સહકારિ મુખ્યં
સંન્યાસશબ્દિત મિતીશ્વરિ ! વિશ્વવન્દ્યાઃ ॥ ૧॥

યથા યતિર્ન્યસ્તસમસ્તકર્મા
તથા ગૃહી કર્મપરોઽપિ નૂનમ્ ।
સદાધિકારી તવ ચિન્તનેઽવ !
ત્વત્સેવનં કસ્ય ન કસ્ય હેતુઃ ॥ ૨॥

ત્વચ્ચિન્તનં દેવિ ! મનોવિશુદ્ધ્યા
ન કર્મણા કર્મવિસર્ગતો વા ।
સમ્પદ્યતેઽતઃ સકલો મુમુક્ષુઃ
શુદ્ધઃ સ્વયં તત્ત્વવિવેચનાર્હઃ ॥ ૩॥

શ્રીયાજ્ઞવલ્ક્યો જનક સ્તથાન્યે
ચોદ્દાલકાદ્યાઃ ખલુ તત્ત્વનિષ્ઠાઃ ।
સર્વેઽપિ ગાર્હ્યસ્થ્યપરા અભૂવન્
કિં વા ગૃહસ્થેન તવાપરાદ્ધમ્ ॥ ૪॥

સર્વાશ્રમી તદ્વદશેષવર્ણી
સર્વો જનશ્વેશ્વરિ ! નિર્વિશેષમ્ ।
અધ્યાત્મનિષ્ઠામધિગન્તુમીશ-

સ્ત્વદ્રૂપિણીં ત્વદ્ભજનૈક મૂલામ્ ॥ ૫॥

મર

શ્રી લક્ષ્મીધર

દેવપ્રયાગ (કવષઃ ૧૪

વ્યવસ્થાપક-પઞ્ચ જોશી

વિશ્વૈકનાથે ! મહિલાત્મિકાત્વં

વિદ્યા વિદ્યાઞ્ચ દદાસિ લોકે ।

તત્તત્ સ્પૃહેભ્યોઽવ તથાપિ કેચિત્

સ્ત્રિયો ન વિદ્યેતિ હ સઙ્ગિરન્તે ॥ ૬॥

ગઙ્ગે ! ભવત્પૂતવિશાલધારા

ભાવત્કવિદ્યેતિ મમ પ્રભાતિ ।

ગૃહ્ણન્તુ સર્વેઽપિ યથેચ્છમેતાં

છિન્દન્તુ તૃષ્ણાં ત્વયિ કસ્ય રોધઃ ॥ ૭॥

સત્યં ન કસ્યાપિ ધનં સ્વકીયં

તથાચ તદ્ગ્રાહકમાર્ષવાક્યમ્ ।

તર્હિ ક્વ તત્રાધિકૃતેર્વિવાદ -

પ્રસઙ્ગ ઇત્યલ્પમતિર્ન વેત્તિ ॥ ૮॥

સત્યસ્વરૂપે ! ત્વમતસ્તથા ત્વ-

દ્યાથાત્મ્ય માહાત્મ્ય નિવેદિકા ગીઃ ।

સૂર્યપ્રભાવત્ સ્વચિરન્તન સ્વં

સર્વસ્ય નૈવાન્યતમસ્ય દેવિ ! ॥ ૯॥

શ્રદ્ધાજડાઃ કિમપિ કાર્યમચિન્તયન્તઃ

સદ્ધાથ દુષ્ટમિતિ હા ! સ્વ વિચારહીનાઃ ।

ક્ષારોદકં પ્રહિરયં ખલુ પૂર્વખાતોઽસ્તી

ત્યાગ્રહાગ્રહધિયો હિ પિબન્તિ સર્વે ॥ ૧૦॥

આનન્દ સુન્દરતનોસ્તવ જનુકન્યે !

સમ્પ્રાપ્તિરત્ર મહિલાઽથ ચ દૈવસમ્પત્ ।

સાજ્યઞ્ચ ??સાધનમિદં દ્વયમેવ નાન્ય-

ન્મન્યે સનાતન સુધર્મ ઇતિ પ્રમુખ્યઃ ॥ ૧૧॥

સર્વેષુ દેશસમયેષુ ચ સન્નયેષુ

સત્પુંસુ ચૈકરસમવ્યભિચારિ યસ્માત્ ।
તસ્માત્ સ્થિરં હ્યપરિવર્તિ ચ મુખ્ય એત-
દ્ધર્મઃ સનાતન ઇતોઽન્યદમુખ્યધર્મઃ ॥ ૧૨॥

ત્વત્ પ્રાપ્તિરેવ પરમે ! પરમઃ પુમર્થો
હ્યાલક્ષ્ય લક્ષ્યમિદમત્ર કરોતિકર્મ ।
યત્ કાલ દેશસદૃશં સતુ શુદ્ધધર્મ-
સ્તદ્વાંસ્તતસ્તવ સનાતન શુદ્ધધર્મી ॥ ૧૩॥

માતર્મહેશિત્રિ ! નિવૃત્તિમન્ત-
ર્દૈવી તુ યા દુર્લભદિવ્યસમ્પત્ ।
મહામહિમ્નોં મમદેહિ ઘોર -
ભવાદવાઙ્ગ્નૌ પ્રલપન્તમેનમ્ ॥ ૧૪॥

અન્તર્નિવૃત્તિં નિતરામવિન્દ -
ન્નાપ્નોતિ બાહ્યોપરમેણ યસ્ત્વામ્ ।
સંન્યાસનામ્ના બત હસ્તિરાજં
બધ્નાતિ મત્તં બિસતન્તુના સઃ ॥ ૧૫॥

ત્વત્તત્ત્વબોધાદિશમાદિનાના-
ગુણૌઘ સમ્પદ્વિધુરસ્ય પુંસઃ ।
બાહ્યોપરામો યદનર્થહેતુર્-
ગર્હ્યાતિગર્હ્યઃ સ વિગર્હતે ત્વામ્ ॥ ૧૬॥

યોગોદ્યુક્તો ભીગવાઞ્છાવિયુક્તો
નાન્યાસક્તઃ સન્તતામોદશાલી ।
યુષ્મદ્વૃત્તિ ર્યોઽવિજાતીયવૃત્તિઃ
સંન્યાસઃ સ્યાદ્ભૂષણં તસ્ય પુંસઃ ॥ ૧૭॥

દ્રવ્યાર્થં ન ત્યજ્યતે દ્રવ્યજાતં
યોષાર્થં વા ત્યજ્યતે નૈવ યોષિત્ ।
કર્માર્થં ન ત્યજ્યતે કર્મ યુષ્મત્-
સ્વરાજ્યાર્થં ત્યજ્યતે સર્વમેતત્ ॥ ૧૮॥

તત્ત્વાસક્તિસ્તત્ત્વચિન્તાનિતાન્તં
તત્ત્વક્રીડાતત્ત્વવિદ્યાપ્રચારઃ ।
શિષ્ટાચારશ્ચાંવ ધર્મોયતીનાં

નેપત્તેષાન્દ્વેષરાગપ્રવૃત્તિઃ ॥ ૧૯॥

ગ્રાર્હ્યસ્થ્યેપિ જ્ઞાનવિચારસ્ય ચ ભક્તે-
ર્નાસમ્ભૂતિઃ કર્મપરે તર્હિ કિમર્થમ્ ।
તત્ત્યાગોંઽબ ! શ્રીપદભક્ત્યા હિ વિમુક્તિ-
ર્ન સ્યાદ્વેષૈસ્તીર્થમુખૈર્વા યતિપદ્ધૈઃ ॥ ૨૦॥

કર્મીધન્યઃ શ્લાઘનીયોઽતિધન્યઃ
કર્મત્યાગો નૈવકાર્યઃ કદાચિત્
મોક્ષો ન સ્યાત્ કર્મઠસ્યેતિ વાદો
નાદર્તવ્યઃ શાસ્ત્રતર્કાદિબાહ્યઃ ॥ ૨૧॥

મુણ્ડિત્વેન ભ્રષ્ટતાં પ્રાપ્ય મૂઢાઃ
સ્વસ્યાન્યેષાઞ્ચેષદપ્યર્થ શૂન્યાઃ ।
જીવન્તીમે કાકતશ્ચાતિગર્હ્યા
નૂનં ભૂમે ર્હન્ત ભારાયમાણાઃ ॥ ૨૨॥

દૈવી સમ્પદ્યા હિ નિવૃત્તિઃ ખલુ મુખ્યા
પ્રાપ્યા મર્ત્યૈરાશ્રમતૃષ્ણા નતુ કાર્યા ।
સર્વ સાક્ષાત્ પ્રશ્યસિ ચિત્તં હિ શિવેત્વં
સર્વજ્ઞાત્રી સર્વમનઃ પીઠનિવાસા ॥ ૨૩॥

સંન્યસ્યન્ બા કાષ્ઠતપસ્યા મુતકુર્વન્
શ્રદ્ધા ભક્ત્યો વૈં તવ નામાપ્યવિજાનન્ ।
ભદ્રં ભદ્રે ! પ્રાપ્સ્યતિ ચેત્તર્હિકથન્નો
ભૂરુડ્રંશ્ચાપિ ભવિષ્યન્તિ સુભદ્રાઃ ॥ ૨૪॥

ચન્દે વન્દે ત્વત્ પદપઙ્કેરુહયુગ્મં
યાચે યાચેઽહં તવ કારુણ્યકટાક્ષમ્ ।
મન્યે ધન્યે ! જાહ્નવિ ! ધર્મધ્વજિમુદ્રે-
ત્યેનં ન્યાસં નિશ્ચલભક્તિ સ્ત્વયિ નો ચેત્ ॥ ૨૫॥

ઇતિ ચતુર્થઃ સ્તબકઃ સમાપ્તઃ ।

## પઞ્ચમઃ સ્તબકઃ

યાદેવિ બ્રહ્મરૂપેણ બ્રહ્મવાદિષુ સંસ્થિતા ।

અસંસ્થિતા ચ ગઙ્ગાયૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧॥

યા દેવી વિષ્ણુરૂપેણ વિષ્ણુવાદિષુ સંસ્થિતા ।
અસંસ્થિતા ચ ગઙ્ગાયૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨॥

યા દેવી શિવરૂપેણ શિવવાદિષુ સંસ્થિતા ।
અસંસ્થિતા ચ ગઙ્ગાયૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૩॥

રામઃ કૃષ્ણો ગજાસ્યસ્ત્રિપુરરિપુ સુતઃ
ષણ્મુખોઽહસ્કરશ્ચ
બ્રહ્મા બ્રાહ્મીતિ યુષ્મદ્ભજન પથજુષાં
ભાવના ભાવિતેન ॥ ૪॥

નાના દેવાત્મના વૈ જનનિ !
વિજયસે વિશ્વમૂર્ત્તિસ્ત્વમેવ
કારુણ્યં તેઽત્ર હેતુ ર્નિરવધિ-
કરુણાવારિધેઃ સ્વાશ્રિતેષુ ॥ ૫॥

યા દેવી કર્મરૂપેણ કર્મવાદિષુ સંસ્થિતા ।
અસંસ્થિતા ચ ગઙ્ગાયૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૬॥

યાદેવી શૂન્યરૂપેણ શૂન્યવાદિષુ સંસ્થિતા ।
અસંસ્થિતા ચ ગઙ્ગાયૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૭॥

યાદેવી ભૂતરૂપેણ ભૂતવાદિષુ સંસ્થિતા ।
અસંસ્થિતા ચ ગઙ્ગાયૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૮॥

યાદેવી સર્વરૂપેણ સર્વવાદિષુ સંસ્થિતા ।
અસંસ્થિતા ચ ગઙ્ગાયૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૯॥

યસ્યા જન્માસ્યજગતો યસ્યાઞ્ચ સ્થિતિરપ્યયઃ ।
ચક્ષુરુન્મેષવત્તસ્યૈ જહ્નુજાયૈ નમો નમઃ ॥ ૧૦॥

યાદેવી વિધૃતિઃ સેતુઃ સર્વેસ્થાને નિયચ્છતિ ।
અસમ્ભેદાયવૈતસ્યૈ જહ્નુજાયૈ નમો નમઃ ॥ ૧૧॥

મઙ્ગલા મઙ્ગલાનાંયા પાવનાનાં ચ પાવની ।
ભુક્તિદા મુક્તિદા ચાસ્યૈ જહ્નુજાયૈ નમો નમઃ ॥ ૧૨॥

અમ્બ ! ત્વામાશ્રયેબાલઃ પ્રસીદાનુગૃહાણમામ્ ।

પુનાતુ પાદરજસા ચૈનમેનોનિધિગ્જનમ્ ॥ ૧૩॥

દેહિ મે વૃત્તિનૈશ્ચલ્યં ત્વત્પાદસરસીરુહે ।
વિધ્વંસય વિજાતીયાંવૃત્તિમત્યન્તદુર્ભગામ્ ॥ ૧૪॥

અમ્બ ! ત્વં શરણં મમ
ત્રિપથગે ! બાહ્યાર્થચિન્તાકુલં
પાદાગ્રેપ્રપતન્તમન્ત-
વિધુરે માં પાહિ મોહાર્ણવાત્ ।
વાત્સલ્યમ્બુનિધે ! સદૈવ
મનસો વ્યાયામભૂમિર્મમ
પ્રત્યગ્બ્રહ્મ તવાસ્તુ નિત્ય-
મચલં નીરૂપરૂપં મહત્ ॥ ૧૫॥

પ્રાતઃ સાયં દિનમનિશા માસસંવત્સરૌચે-
ત્યેવઙ્કાલઃ પ્રચલતિચલત્યાયુરત્યુગ્રવેગમ્ ।
ક્ષુદ્રાન્ ભોગાન્ ત્યજતુ ભજતુ શ્રીપદં પ્રેમતોઽન્તઃ
સ્વર્ગઙ્ગાયાઃ શ્વ ઇતિ મતિમાન્માનવો મા બ્રવીતુ ॥ ૧૬॥

યાવચ્છ્રદ્ધા રતિસ્તાવત્ત્વત્તત્ત્વે સમ્ભવેન્નૃણામ્ ।
અત્યન્તાવેશતોઽત્રૈવ નિત્યશાન્તિફલોદયઃ ॥ ૧૭॥

પણ્ડિતસ્ત્વાં ન જાનાતિ શ્રદ્ધાવાત્ વેત્તિ તત્ત્વતઃ ।
બ્રમ્ભ્રમીતિમનોજ્ઞસ્ય નોચેન્નતુ સ પણ્ડિતઃ ॥ ૧૮॥

શબ્દાનુમાનવિપિને વિપુલે ભ્રમદ્ભિ-
ર્ન પ્રાપ્યતેંઽબ તવતત્ત્વમરં હિ તદ્ધૈ ।
શ્રદ્ધૈધિતાન્તરવબોધબૃહત્પ્રદીપ-
પ્રદ્યોતનૈકસુલભં ધિષણાગૃહાન્તે ॥ ૧૯॥

અસ્તીતિ ભાતીતિ ભવત્પ્રકાશ-
માસ્તિક્યબુદ્ધ્યાંઽબ કરોમિ સાક્ષાત્ ।
તતશ્ચ સચ્ચિત્ સુખરૂપિણિ ! ત્વા-
મભ્યર્થયેઽવેતિ ભવામ્બુધેર્મામ્ ॥ ૨૦॥

ગઙ્ગોત્તરીક્ષેત્ર વિહારશીલાં
ગઙ્ગા મનઙ્ગારિશિરોવિભૂષામ્ ।

સર્વાત્મના ત્વાં પ્રણતોઽસ્મિ નિત્યં
સર્વાત્મિકાં ત્વત્પરતાપ્રસિદ્ધ્યૈ ॥ ૨૧॥

પ્રસીદ ગઙ્ગે ! ભગવત્યભીક્ષ્ણં
ત્વત્પ્રેમયાચેઽન્યદહં ન યાચે ।
ત્વદમ્બુધારાવદખણ્ડરૂપં
પ્રસીદ ભૂયોઽપિ નમોંઽઘ્રિપાતૈઃ ॥ ૨૨॥

ગઙ્ગોત્તરીક્ષેત્રમનુત્તમં શ્રી-
ગોત્રાધિપોત્તુઙ્ગ શિરોઽવતંસઃ ।
પુણ્યં મહત્પૂજ્યતમઞ્ચ સાક્ષાત્ -
દુત્પત્તિભૂરસ્તિસુરાપગાયાઃ ॥ ૨૩॥

તત્રામ્બિકાપરમિદં નિવસન્નકાર્ષં
સ્તોત્રં મહાર્હમહમમ્બિકયાનિયુક્તઃ ।
તત્પાદયોરુપહૃતઞ્ચ તદસ્તુ તસ્યાઃ
પ્રીત્યૈ ચ શુભ્રલઘુમત્સ્મિતપોતકાય ॥ ૨૪॥

ગઙ્ગોત્તર્યામિહ ગિરિગુહાવેશ્મનિ ત્વત્પદાન્તે
પાદ્મેપીઠે સ્થિરમૃજુ કદા સંસ્થિતઃ સન્ સુખેન ।
ન્યસ્તસ્વાન્તસ્ત્વયિ શિવ તનો ! દેવિ ! કસ્તૂરિકાણાં
સઙ્ઘર્ષાશ્માયિતમિદમહં વિસ્મરિષ્યામિ દેહમ્ ॥ ૨૫॥

ઇતિ પઞ્ચમઃ સ્તબકઃ સમાપ્તઃ ।

ઇતિ શ્રીગઙ્ગોત્તરીક્ષેત્ર વાસ્તવ્યેન
પૂજ્યપાદશ્રીતપોવનસ્વામિનાસમ્પ્રણીતં
શ્રી ગઙ્ગાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Ganga Stotram*

pdf was typeset on August 17, 2025

Please send corrections to *sanskrit@cheerful.com*